तत् पण्यमस्य किश(स)रा० ष्ठन् । किश(स)रिक किश(स)रविक्रयकर्त्तरि स्त्रियां षित्त्वात् ङीष् । शब्देन्दुशेखरे तालव्यमध्यतया पठितः अन्यत्र दन्त्यमध्यतयेत्युभयरूपता

**किशरा** स्त्री० किञ्चित् शृणाति शॄ—अच् । शर्करायाम् । ततो-मध्वा० चतुरर्थ्यां मतुप् मस्य वः । किशरावत् तद्वति देशे

**किश(स)रादि** पुं पाणिन्युक्ते ष्ठन्प्रत्ययप्रकृतिभूते शब्दगणे सच गणः "किश(स)र नरद नलद स्थासक तगर गुग्गुलु उशीर हरिद्रा हरिद्रुपर्णी" ।

**किशल** पुं न० किञ्चित्शलति शल—गतौ अच् पृषो० मलोपः । नवपल्लवे शब्दरत्ना० ।

**किशलय** पुं न०किञ्चित्शलति शल—चलने वा कयन् पृषो० । नवपल्लवे शब्दरत्ना० ।

**किशोर** पुं कश—शब्दे किशोरा० निपा० । १अश्वशिशौ २तैलपर्ण्यौषधौ ३सूर्य्ये च मेदि० "किञ्चिच्छूरः किशोरः स्यात् यतो हि दशमात् परम् । शूरत्वं दृश्यते किञ्चिदनुवृद्धं दिने दिने" ४इत्युक्तावस्थापन्ने त्रि० । स्त्रियां वयोवाचित्वात् ङीष् किशोरी । "कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि । कैशोरमापञ्चदशात् यौवनञ्च ततः परम्" भाग०टीकाकृच्छ्रीधरधृतवचनात् दशवर्षोत्तरं पञ्चदशाब्दपर्य्यन्तवयस्कःकिशोर इति बोध्यम् ।

**किष्क** बधे चुरा० आत्म० सक० सेट् । किष्कयते अचिकिष्कत

**किष्किन्ध** पु० किं किं दधाति धा—क पारस्करा० सुट् षत्वं मलोपः । वृह०सं० कूर्मविभागे आग्नेय्यामुक्ते १देशभेदे "आग्नेय्यां दिशि कोशलकलिङ्गवङ्गोपवङ्गजटराङ्गाः" इत्युपक्रमे "किष्किन्धकण्टकस्थलनिषादराष्ट्राणि पुरिकदाशार्णाः" इति । तत्रत्ये २पर्वतभेदे च । ३तत्रत्यवालिराजधान्यां ४तत्रत्यगुहायाञ्च स्त्री शब्दर० । "त्वया सह महाबाहो ! किष्किन्धोपवने तदा" । "गच्छ लक्ष्मण ! जानीहि किष्किन्धायां कपीश्वरम्" । "किष्किन्धाद्वारमासाद्य प्रविवेशानिवारितः" भा०व०२८१अ० । "गुहामासादयामास किष्किन्ध्यां लोकविश्रुताम् । तत्र वानरराजाभ्यामैन्देन द्विपदेन च । युयुधे दिवसान् सप्त" भा०स०३०अ० । दक्षिणदिग्विजये । किष्किन्धा अभिजनोऽस्य सिन्ध्वा० अण् । कैष्किन्ध पित्रादिक्रमेण किष्किन्धागुहातत्पुरीवासिनि त्रि० स्त्रियां ङीप् ।

**किष्किन्धा(न्ध्या)काण्ड** न० वाल्मीकिरामायणान्तर्गते किष्किन्धाधिकारेण वालिसुग्रीवादीनामितिवृत्तप्रतिपादके काण्डभेदे ।

**किष्किन्धी** स्त्री किष्किन्ध+गौरा० ङीष् । किष्किन्धपर्व्वतगुहायाम् "अभ्येत्य सर्व्वे किष्किन्ध्याम्" भा०व०२७९अ० ।

**किष्किन्ध्य** पु० किष्किन्ध+स्वार्थे यत् । १किष्किन्धशब्दार्थे २तत्रत्यपर्वतगुहायां ३वालिराजधान्यां च स्त्री

**किष्किन्धेशा(न्ध्या)धिप** पु० ६त० । वालिनामके वानरराजे जटा० शब्दर०

**किष्कु** पु०स्त्री० किष्क—उन्,किम्+कै—कु पृषो० मलोपः पार-स्क० सुट्षत्वम् वा । १वितस्तौ द्वादशाङ्गुलपरिमाणे चतुर्विंशत्यङ्गुल परिमाणे२हस्तमाने मेदि०२प्रकोष्ठे ३कफोणेरधो-मणिबन्धपर्य्यन्ते च४कुत्सिते त्रि० विश्वः"दशविष्कुसहस्रां तां मापयामास सर्वतः" भा०स०१२०अ० "दशकिष्कुसहस्राणि समन्तादायताऽभवत्" भा० स० ३अ० । "अवर्द्धत महातेजाः किष्कून्राजंस्त्रयोदश" भा०व० १२६अ० ।

**किष्कुपर्व्वन्** न० किष्कुमितं वितस्तिमितं हस्तमितं वा पर्वास्य । १वंशे (बाँश) २इक्षौ ३पोटगले(नडा)च मेदि०

**किसल** पुंन० किञ्चित् सलति सल—गतौ अच् पृषो० मलोपः । नवपल्लवे त्रिक०० ।

**किसलय** पुंन० किम् ईषत् सलति—सल गतौ बा० कयन् पृषो० । नवपल्लवे अमरः । "किसलयैः सलयैरिव पाणिभिः" रघुः । तारका०जातार्थे इतच् । किसलयित नवपल्लविते । किसलयस्य नवपत्रादियुक्तशाखाग्रस्थितः पल्लवः ।

**की** अव्य० कुत्सायाम् ।

**कीकट** पु० की+कट—अच् । "चरणाद्रिं समारभ्य गृध्रकूटान्तकं शिवे ! । तावत् कीकटदेशःस्यात् तदन्तर्मगधोभवेत्" शक्तिसङ्गमोक्ते १देशभेदे । तद्देशवासिजनवाचित्वेऽस्य भूम्नि "साधवः समुदाचारास्ते पूयन्तेऽपि कीकटाः" भाग० ७,१०,२० । उपचारात् देशेऽपि भूम्नि "ततः कलौ संप्रवृत्ते सम्मोहाय सुरद्विषाम् । बुद्धोनाम्ना जिनसुतः कीकटेषु भविष्यति" भाग० १,३,२५ । ४निर्द्धने ५कृपणे च त्रि० मेदि० । ६घोटके पुं स्त्री विश्वः स्त्रियां जातित्वात् ङीष् [ शब्दचि० ।

**कीकश** पु० कीति कशति कश—शब्दे अच् । चण्डाले ।

**कीकस** पु० कीति कसति कस—गतौ अच् । १कृमिजन्तुभेदे २अस्थि, न० अमरः ३कठिने त्रि० मेदि० । "यदन्तर्य्यस्तकीकसम्" अमरः । शब्दरत्ना०स्त्रीत्वमपि "तस्मादिमा उभयत्र पर्शवोबद्धाः कीकसासु च जत्रुषु च" शत०ब्रा० ८,६,२,१० । कीकसेश्वरः काशीखण्डशब्दे उदा०

**कीकसास्य** पुं स्त्री० कीकसमास्येऽस्य । पक्षिणि हारा०